आरम्भ वर्ष - 2023,
चातुर्मासिक - Tri-Annual

वर्ष - प्रथम
अङ्क - प्रथमः (दिसम्बर - 2023)
ऑनलाइन प्रकाशन

# बुन्देलखण्ड विमर्श
# BUNDELKHAND VIMARSH

## (भारतीय ज्ञान परम्परा की सान्दर्भिक एवं पुनरीक्षित शोधपत्रिका)
(Refereed and Reviewed Research Journal of Indian Knowledge System)

: प्रकाशक :

संस्कृति संस्कृत संस्कार शिक्षा समिति
॥ तन्मे मनः शिवसङ्कल्पमस्तु ॥

**बरौदी संस्कृति संस्कृत संस्कार शिक्षा समिति**
**BARAUDI SANSKRITI SANSKRIT SANSKAR SHIKSHA SAMITI**
**ग्राम - बरौदी, पत्रालय - सनौरा, जिला - दतिया (मध्यप्रदेश), भारत, 475686.**
Vill.- Barodi, P.O.-Sanora, Distt.-Datia(Madhya Pradesh) Bharat,475686.
Cont.- +91 88277 66640, +91 78799 58816,
Email:- sanskritsamiti17@gmail.com, Website:- www.sanskritsamiti.org

**शोधपत्रिका विवरण :-**

- शोधपत्रिका का नाम (हिन्दी में) - बुन्देलखण्ड विमर्श
- शोध पत्रिका का नाम (अंग्रेजी में) - BUNDELKHAND VIMARSH
- प्रकाशन का विषय क्षेत्र - बहु विषयक
- प्रकाशन की भाषा - बहुभाषिक
- आरम्भ वर्ष - 2023
- प्रकाशन अवधि - चातुर्मासिक (Tri-Annual)
- प्रकाशन माध्यम - ऑनलाइन

**अंक विवरण :-**

- प्रकाशन वर्ष - द्वितीय
- अङ्क - चतुर्थ (दिसम्बर - 2024)

**सदस्यता विवरण :-**

- वार्षिक सदस्यता - 1500/- रुपये मात्र
- एक अंक - 750/- रुपये मात्र

**प्रकाशक विवरण :-**

बरौदी संस्कृति संस्कृत संस्कार शिक्षा समिति

**सम्पर्क सूत्र :-**

ग्राम - बरौदी, पत्रालय - सनौरा, जिला - दतिया (मध्यप्रदेश), भारत, 475686.
Vill.- Barodi, P.O.-Sanora, Distt.-Datia (Madhya Pradesh) Bharat, 475686.
Cont.- +91 88277 66640, +91 78799 58816.
Email :- sanskritsamiti17@gmail.com, Website :- www.sanskritsamiti.org

**प्रधान सम्पादक**

डॉ. उपेन्द्र भार्गव

**सम्पादक**

डॉ. आनन्द प्रकाश शुक्ल

**सह सम्पादक**

डॉ. कपिल कुमार भार्गव, आकृति शर्मा, नीता शर्मा

**सम्पादक मण्डल**

प्रो. श्यामदेव मिश्र (उत्तर प्रदेश)
प्रो. प्रसाद गोखले (महाराष्ट्र)
डॉ. दिनेश रसाळ (महाराष्ट्र)
डॉ. कृष्णकान्त तिवारी (मध्य प्रदेश)
प्रो. नीलाभ तिवारी (मध्य प्रदेश)
प्रो. पराग जोशी (महाराष्ट्र)
डॉ. नितिन जैन (नयी दिल्ली)
डॉ. रमण मिश्र (मध्य प्रदेश)

**सहायक सम्पादक**

डॉ. अखिलेश कुमार द्विवेदी (मध्य प्रदेश)
डॉ. धनञ्जय मिश्र (जम्मू एवं कश्मीर)
डॉ. हिमांशु द्विवेदी (मध्य प्रदेश)
डॉ. नरेश शर्मा (हरियाणा)
डॉ. रामकुमारी (गुजरात)
डॉ. लवलेश मिश्र (मध्य प्रदेश)
डॉ. कृष्णकुमार भार्गव (आन्ध्र प्रदेश)
डॉ. मोहन बैरागी (मध्य प्रदेश)
डॉ. शमीनाज़ खान (शिमला)
डॉ. राकेश दास (पश्चिम बंगाल)
डॉ. लक्ष्मीविजयन् वी.टी. (केरल)
डॉ. मृत्युञ्जय कुमार मिश्र (राजस्थान)
डॉ. देशबन्धु (नयी दिल्ली)
डॉ. अवतारजीत सिंह(म.प्र.)
डॉ. पुष्पिन्दर जोशी (पंजाब)
डॉ. रूपाली सारये (मध्य प्रदेश)
डॉ. प्रभाकर पाण्डेय (मध्य प्रदेश)
डॉ. रमा आर्या (मध्य प्रदेश)
डॉ. अवधेश श्रोत्रिय (बिहार)
डॉ. दीपक पाठक (उत्तर प्रदेश)
शिरीन कुरैशी (मध्य प्रदेश)
डॉ. प्रियव्रत मिश्र (उडीसा)
डॉ. अखिलेश्वर मिश्र (तमिलनाडु)

**प्रबन्धन एवं तकनीकि सम्पादक**

विवेक कुमार शर्मा
राज भार्गव

# सम्पादकीय

“स्वाध्यायप्रवचनाभ्यं न प्रमदितव्यम्” इस उपनिषद वाक्य के ध्येय को जीवन लक्ष्य बनाकर भारतीय ज्ञान परम्परा के सिद्धान्तों द्वारा अपनी तीक्ष्ण बुद्धि से अनेक शोध अध्येता, अनुसंधाता तथा गवेषकों ने प्राचीन काल से चारों वेद, छह वेदांग, अठारहों पुराण, रामायण, महाभारत, शताधिक उपनिषद, दर्शन और विस्तृत संस्कृत वाङ्मय के अथाह ज्ञानसिन्धु को पार करने का प्रयत्न किया है और वर्तमान में भी यह यात्रा अनवरत रूप से प्रवाहमान है। प्रत्येक शोधार्थी के लिए यह आवश्यक है कि वह निरन्तर स्वाध्याय करे और स्वाध्याय से उपार्जित ज्ञान को अपने आलेख द्वारा अन्य ज्ञान पिपासुओं तक सम्प्रेषित करने का यत्न भी करे तभी अध्ययन एवं अनुसन्धान की सार्थकता सिद्ध होती है। ज्ञानप्रवाह को निष्कल्मष बनाए रखने के लिए यह आवश्यक है कि शोध, अनुसन्धान एवं गवेषणा को प्रोत्साहित किया जाए तथा शोधार्थियों को पर्याप्त अवसर उपलब्ध कराये जाने चाहिए जिससे संचित ज्ञान की अभिरक्षा तथा भविष्य के लिए उसका पोषण सुनिश्चित किया जा सके।

वर्तमान में भारतीय ज्ञान परम्परा के साथ अन्य आधुनिक ज्ञान - विज्ञान के समावेशी एवं अन्तर्विषयी तथा भारतीय भाषाओं में शोध अभिव्यक्ति को प्रोत्साहित करने के लिए जो प्रावधान तथा प्रयत्न वर्तमान ‘राष्ट्रीय शिक्षा नीति’ में किये गए हैं वे निश्चित रूप से शिक्षा में क्रान्ति का सूत्रपात करते हैं। भारतीय ज्ञान मीमांसा में योग, ज्योतिष आयुर्वेद, वेदान्त, राजनीति, धर्म, समाज, अर्थशास्त्र तथा मनोविज्ञान आदि ऐसे अनेक महत्वपूर्ण विषय हैं जिनका अध्ययन अन्य विषयों के परस्पर सामंजस्य से नूतन दृष्टि प्रदान करता है।

अतः प्रस्तुत शोध पत्रिका 'बुन्देलखण्ड विमर्श' भारतीय ज्ञान परम्परा में निहित लोक कल्याण परक विषयों के प्रचार - प्रसार, उन्नयन एवं शोध उद्देश्यों को पूर्ण करने हेतु सुधी पाठकों, विद्वज्जनों, समीक्षकों, आलोचकों के समक्ष प्रस्तुत है। हमारा लक्ष्य है कि पत्रिका में प्रकाशित होने वाले शोधपत्रों के माध्यम से हमारे अध्येता शोधार्थियों के ज्ञान में वृद्धि हो तथा वे सान्दर्भिक शोध की दिशा में प्रवृत्त हो सकें। हमें आशा है कि हमारे प्रिय पाठकों के महत्वपूर्ण सुझाव और मार्गदर्शन हमें निरन्तर प्राप्त होंगे जिनसे हम अपनी गुणवत्ता विकसित कर सकेंगे तथा आपके लिए सुदृढ़ बौद्धिक पाथेय उपलब्ध करा सकेंगे।

आपके स्नेह एवं सहयोग का आकाङ्क्षी

डॉ. आनन्द प्रकाश शुक्ल

चैत्र शुक्ल एकादशी

३० दिसम्बर २०२४

# विषयानुक्रमणिका


| क्र. | शोधपत्र शीर्षक | लेखक का नाम | पृ. क्र. |
|---|---|---|---|
| 01 | दिक्साधनं तत्स्वरूपञ्च | सोनाली | 01 - 08 |
| 02 | ज्योतिषशास्त्रे ग्रहाणां सम्बन्धितरोगानां विचारः | राकेश ममगाईं | 09 - 14 |
| 03 | नागरशैल्यां प्राचीनमन्दिराणां स्थापत्यकला | मेघा शर्मा | 15 - 23 |
| 04 | राजा भोज एवं देवालय की वास्तु शैली : एक अवलोकन | रिपुदमन चंद्र | 24 - 31 |
| 05 | भाषावृत्तिपञ्जिकाकृत् विश्वरूपोपाध्याय: | डॉ. प्रियव्रत मिश्र | 32 - 37 |
| 06 | किन्नर साहित्य : लोकसाहित्य के विशेष संदर्भ में | डॉ. रूपाली सारये | 38 - 41 |
| 07 | बुंदेली लोक गीतों में राम | डॉ. रमा आर्या | 42 - 53 |
| 08 | हिन्दी उपन्यासों में दिव्यांग विमर्श | गिरजाशंकर कुशवाहा | 54 - 58 |

# दिक्साधनं तत्स्वरूपञ्च

**सोनाली**[1]

**शोधपत्रसारांशः -**

दिग्साधने अनेकाः विधयः सन्ति। प्रायः जनाः उदयकालिकभास्करं दृष्ट्वा दिशायाः निर्धारणं कुर्वन्ति। किन्तु इयं विधिः प्रामाणिकं न अस्ति। यतोहि सूर्यप्रतिदिनं निश्चयेन पूर्वात् न निर्गच्छति। पूर्वे स्पष्टसूर्योदयः बर्षे द्विवारं सायनमेषः तथा सायनतुलायाःसंक्रमणस्य काले अर्थात् चैत्र 21 एवं 23 आश्विनमासे एव भवति। इतरभिन्नं उत्तरायणदक्षिणायणश्च कारणात् सूर्यस्य स्थितिः प्रतिदिनं परिवर्तते। अतः दिशायाः इयं विधिः न विश्वसनीयः। दिशानिर्धारणस्य एकाविधिः **मैग्नेटिककम्पास**इति। एतत् दिशासूचकयत्रं अस्ति यत्र दिशासूचकाः चिह्निताः भवन्ति। तस्य केन्द्रे एकं लोहसूचिका भवति या पृथिव्याः उत्तरध्रुवाद् आकृष्टः सदा उत्तरदिशां सूचयति। विभिन्नग्रन्थेषु दिक् साधनस्य नियमः बहु सम्यक् रुपेण विभिन्नप्रकारेण वर्णितम्।

**कूटशब्दाः** - दिग्साधनम्, उदयकालिकभास्करः, दिशा, सूर्यः, सायनमेषः, सायनतुला, उत्तरायणम्, दक्षिणायनम्, मैग्नेटिककम्पास, दिशासूचकयन्त्रम्, लोहसूचिका, उत्तरध्रुवः।

---

वास्तुशास्त्रस्य ज्योतिषेण निकटतमं सम्बन्धमस्ति। तस्य भगोलभूगर्भसिद्धांतगणितेन च घनिष्टसंबन्धमस्ति। ज्योतिर्विज्ञानवेधशाला यज्ञयागादि कार्येषु यज्ञकुण्डमण्डपनिर्माणं भवनप्रासादमन्दिराणां च निर्माणकार्येषु विशेषोपयोगं भवति। वास्तुशास्त्रे भवननिर्माणस्योपरि विशेषचर्चा दृश्यते। कस्यां दिशायां केभ्यः निर्माणं श्रेयस्करं भवति इति प्रश्नः। पूजागृहं कोषागारस्नानगृहशौचालयशयनाध्ययनस्वागतभोजनकक्षादिनिर्माणस्य प्राथमिकता भवति अतः ज्योतिर्विज्ञानशालायज्ञयागादिकर्मभवननिर्माणे सर्वप्रथमं दिक्साधनं परमावश्यकमस्ति। प्राचीनाचार्याः दर्शनज्योतिषशास्त्राणां माध्यमेन दिशायाः स्वरूपस्य निर्धारणम् अकरोत्। दार्शनिकाः दिशायाः गणना नवद्रव्ये गणयन्तः उक्तवन्तः यत् **क्षिप्यप्तेजो मरूद्व्योमकालदिग्देहिनी**

---

[1] शोधच्छात्रा - वास्तुविभागः, श्री लालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली

**मनः इति नवद्रव्याणि** ।[2] न्यायसिद्धान्तमुक्तावलीकारः अपि दिशां मानवव्यवहारहेतुः दर्शयति **पूर्वापरादिव्यवहारहेतुः दिगिति** ।[3] दिक् निर्धारणस्य परम्परा वैदिककालादेव अस्ति। अस्य प्रमाणं वेदेष्वपि प्राप्नोति यथा ऋग्वेदे दिशानां उद्भवं विराटपुरूषस्य कर्णेन अभवत् -

**नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत।**
**पद्भ्यां भूमिर्दिशः श्रोत्रात् तथा लोकान् अकल्पयन्॥**[4]

वेदेषु इमे उल्लेखमपि प्राप्नोति यत् पूर्वादि चत्वारि मुख्यदिशाश्च तयोः संयोगेन चत्वारि विदिशाः भवन्ति । ऊर्ध्वाधो भागं मिलित्वा आहत्यः दशदिशाः सन्ति **चतस्त्रो दिगश्चतस्तोवान्तरदिश ऊर्ध्वयं नवमी दिङ्** ।[5] वैदिककाले दिग्ज्ञानस्य महद् महत्त्वं दत्तम् आसीत्। यज्ञवेद्याः निर्माणाय दिशायाः ज्ञानमे अत्यावश्यकम् । अतः एव याज्ञकः दिशायाः निर्धारणार्थं विशेषरूपेण प्रयतमानो दृश्यन्ते। दिग्विषयेज्ञानमपि महाभारते प्राप्यते। उत्तरपश्चिमं प्रति शयनस्य निषेधं तत्र तथाश्च पूर्वदक्षिणं प्रति शिरं कृत्वा शयनं निर्दिष्टः –

**उदक् शिरा न स्वपेत् तथा प्रत्यक् शिरा न च।**
**प्राक् शिरास्तु स्वपेद् विद्वानथवा दक्षिणाशिराः॥**[6]

वास्तुशास्त्रीयग्रन्थेषु विस्तारेण दिग्विषये चर्चा प्राप्नोति । तत्र भवनप्रासादतथाश्च विमानस्य दिग्निर्धारणं शङ्कुद्वारा भवति। एतेषां भवनानां दिङ्गुढत्वकारणेन कुलनाशकरूपी फलस्य निर्देशं उक्तम् –

**प्रासादे सदनेलिन्दे द्वारे कुण्डे विशेषतः।**
**दिङ्मूढे कुलनाशः स्यात्तस्मात् संसाधयेद्दिशः।।**[7]

दिग्साधने अनेकाः विधयः सन्ति । प्रायः जनाः उदयकालिकभास्करं दृष्ट्वा दिशायाः निर्धारणं कुर्वन्ति। किन्तु इयं विधिः प्रामाणिकं न अस्ति। यतोहि सूर्यप्रतिदिनं निश्चयेन पूर्वात् न निर्गच्छति। पूर्वे स्पष्टसूर्योदयः बर्षे द्विवारं सायनमेषः तथा सायनतुलायाःसंक्रमणस्य काले अर्थात् चैत्र 21 एवं 23 आश्विनमासे एव भवति। इतरभिन्नं उत्तरायणदक्षिणायणश्च कारणात् सूर्यस्य स्थितिः प्रतिदिनं परिवर्तते । अतः दिशायाः इयं विधिः न विश्वसनीयः । दिशानिर्धारणस्य एकाविधिः **मैग्नेटिककम्पास**इति । एतत् दिशासूचकयत्रं अस्ति यत्र दिशासूचकाः चिह्निताः भवन्ति। तस्य केन्द्रे एकं लोहसूचिका भवति या पृथिव्याः उत्तरध्रुवाद् आकृष्टः सदा उत्तरदिशां सूचयति। विभिन्नग्रन्थेषु दिक् साधनस्य नियमः बहु सम्यक् रुपेण विभिन्नप्रकारेण वर्णितं।

- **क्रान्तिमाध्यमेन दिक् साधनम् -**

---

[2] कारिकावली कारिका स.3
[3] न्यायासिद्धान्तमुक्तावली
[4] ऋग्वेद,10.10.19.14
[5] शा.श्रौ.सू.16.24.2
[6] महाभारत,104.48
[7] बृहद्वास्तुमाला,दिक्साधन,श्लोक.1

जलसदृशः समीकृतसमतलभूमौ वृत्तस्य निर्माणं कृत्वा तस्य केन्द्रे द्वादशाङ्गुलप्रमाणकं शङ्कुः स्थापनं करिष्यामः। सूर्योदयात् पूर्वाह्णात् पूर्वं वृत्ते यतः छाया दृश्यते स पश्चिमं एवं मध्याह्न पर्यन्तं यतः छाया जातं स बिन्दुः पूर्वदिशायाः द्योतकं भविष्यति। ज्ञातव्यमस्ति यत् अस्मिन् प्रकारेण पश्चिमबिन्दोः निर्माणं भवति। किन्तु क्रान्तिगतिः अनुरूपं पूर्वोक्तं बिन्दुः मानं स्थूलगतं भवति। एवं प्रकारेण स्थूलबिन्दुं ज्ञानार्थं छायाप्रवेशनिर्गमश्च समयोः क्रान्तिज्याणां ज्ञानं क्रियते तथा च छायाकर्णात् गुणा क्रियते , इष्टलम्बज्यात् भागं कृत्वा प्राप्तमानसदृशः अङ्गुलादि अयनस्य दिशायां बिन्दुः संचालनं कुर्युः। एवं प्रकारेण वास्तविकं बिन्दोः ज्ञानं भविष्यति। अन्यप्रकारेण उत्तरध्रुवं वेधित्वा उत्तरदिशायाः ज्ञानं क्रियते अथवा वृत्तमध्यस्थशङ्कुः एकसमयस्य एव छायाग्र ज्ञातकृत्वा तस्य इष्टकालस्य भुज एवं कोटिः क्रियते , भुज - कोटिः तुल्यं शलाकायाः ज्ञानं एवं प्रकारेण कुर्मः यत् शलाकायां यग्र अर्थात् यष्टयग्रस्य योगं भवितुं शक्नोति , एतत् कारणात् कोटिः पूर्वा– पर एवं दक्षिण – उत्तरश्च भविष्यति।

वैदिकज्योतिषसमयात् एव शङ्कुषा छाया, मुहुर्तादि गणनापरम्परा वर्तते। **अथर्ववेदीयज्यौतिषम्** ग्रन्थे सर्वप्रथमं शङ्कुच्छाया प्रमाणेन एव पञ्चदश मुहुर्तज्ञानस्य वर्णनं वर्तते। प्रातः काले यदा सूर्यार्धं बिम्बगोचरं तदा द्वादश अङ्गुल दीर्घता एका समरेखा –स्निग्ध – ऊर्ध्वाधर गोल शंकुं पृथिव्यां ऊर्ध्वं स्थापयतु। तस्मिन् समये शङ्कुच्छाया पश्चिमाभिमुखा भुवि एवं 90+6 -96 अङ्गुलीप्रमाणं भविष्यति। प्रतिदिनम् अस्मात् समयात् रौद्रनामकः मुहर्तः आरभ्यते। एषा छाया क्रमेण मध्याह्नपर्यन्तं न्यूनीभवति । यदा एतत् छायाप्रमाणं 61 अङ्गुलयोः यावत् न्यूनीकरोति, तदा रौद्रमुहूर्तः समाप्तः भवति। यदा शङ्कुच्छाया 60 तः 13 अङ्गुलयोः भवति, तदा अन्यत् मुहूर्तं श्वेत नाम अस्ति। 12 अङ्गुलशङ्कुच्छायातः यावत् सप्ताङ्गुलपर्यन्तं तृतीयमुहूर्तं मैत्रं कथ्यते। छायायाः 6 अङ्गुलतः एकाङ्गुल्या न्यूनच्छायया सावित्र नाम पञ्चमं मुहूर्तं प्रारभ्यते। तथैव चतुरङ्गुलशङ्कुच्छाया भवति चेत् तदा वैराग नाम षष्ठी मुहूर्तं आरभ्यते । यदा छाया त्रीणि अङ्गुलानि न्यूनीकृता भवति ततः विश्वावसु सप्तमो मुहूर्तः आरभ्यते यदा च शङ्कुच्छाया द्वयाङ्गुलाभ्याः न्यूना भवति तदनन्तरं अभिजित् नामक मुहूर्तं प्रारभ्यते ।यदा अभिजीतस्य मध्यकालः भवति तदा छाया शून्यं भवति अथवा उत्तरदक्षिणदिशि वा गच्छति। तस्मिन् काले शङ्कुछाया शङ्कु मूले एव भवति। मध्याह्नकालस्य अनन्तरं शङ्कुच्छाया पूर्वदिशि अपि आरभ्यते । यावत् अङ्गुल्याः अधिकः भविष्यति ततः रोहिण नाम नवं मुहूर्तं प्रारभ्यते , यः त्रयः अङ्गुलीः यावत् स्थास्यति, चतुः अङ्गुल्याः छाया भवति तदा दशमं बल नाम मुहूर्तं समाप्तं भवति। पञ्च अङ्गुल्यः शङ्कुच्छाया षट् अङ्गुलीनां यावत् तिष्ठति तावत्पर्यन्तं द्वादश नैर्ऋत नामक मुहूर्तं तथा द्वादश अङ्गुल पर्यन्तं त्रयोदश वारूण मुहूर्तं भवति। तत् पश्चात् सूर्यास्तपर्यन्तं भग नामक पञ्चदशमुहूर्तं भवति। सूर्यास्तकाले छाया पूर्वदिशि 96 अङ्गुलीः भवति। एतानि सर्वाणि प्रातःकाले सूर्यास्तं यावत् 10 +2+3 =15 मुहूर्ता इति उक्तम् अस्ति। तथा च एते मुहूर्ताः रात्रौ एतस्मिन् क्रमे भवति।[8]

---

[8] सिद्धान्तशिरोमणि 3,8-9

सुगमोपायेन दिग्ज्ञानमुक्तं ग्रहलाघवे यत् – समतलभूमौ निर्मितस्य वृत्ते मध्यभागे स्थितस्य शङ्कुस्य सूर्योदयकाले यत्र छाया प्रविशति तथा अस्तकाले यतः आगतः अर्थात् स्पर्शं करोति , उभयबिन्दुपर्यन्तं गच्छन्ती रेखा पूर्वापरा भवति अर्थः अस्ति यत् छायायाः प्रवेशबिन्दुः पश्चिमं एवं निर्गम बिन्दुः पूर्वदिशायाः चिन्हम् अस्ति। एतयोः द्वयोः चापद्वारा निर्मितं मत्स्यस्य मुखं पुच्छं च मिश्रयति रेखा दक्षिणोत्तरी भविष्यति। अर्थः अस्ति यत् पूर्वापरस्य मध्यबिन्दौ निर्मितं लम्बः दक्षिणं उत्तरदिशि च दिशां वक्ष्यति।[9] मुहूर्तमार्तण्डे नक्षत्रवशेन दिग्ज्ञानमुक्तं यत् –

**प्राक् साध्योज्जयिनीस्थलाद्यमदिशि त्वाष्ट्रानिलाभ्यन्तरा।**
**सौम्येतोम्र्युदयादुदग्ध्रुमुखाद्दिङ्मूढके स्यान्मृतिः॥**[10]

अर्थात् उज्जैनात् दक्षिणे कल्पितंक स्थानात् दिक्साधनं प्रयोक्तव्यं तर्हि रात्रौ काले चित्रानक्षत्रस्य बिम्वोदय कत्वा नलिकेण छिद्रयति नलिकाग्रात् लम्बसूत्रं यदि तस्मिन्नेव भूमौ स्थाप्यते तदा तत् प बिन्दौ पतिष्यति। तत्र चिह्नितव्यम्। तथैव स्वात्यादन्यनक्षत्राणां समुत्पद्यतः यथा उन्नतांशायां चित्रा भेदिता कर्त्तव्या तथैव उन्नतांशायां स्वातिभेदनेन नलिकाग्रभागात् लम्बसूत्रं फ बिन्दौ पतितः, तत्र चिह्नेन द्वयोः चिह्नयोः मध्ये व बिन्दुः पूर्वा सः पूर्वदिशा कल्प्यते। उज्जैनमुत्तरं दिशि य बिन्दुतः पूर्वदिशां यदि ज्ञातव्यं तर्हि निशाकाले कृतिकोदयसमये भेदनं कुरु, यत्र लम्बसूत्रं र बिन्दौ सम्मिलितः तत्र चिह्नानि पूर्वदिशां वक्ष्यन्ति। उत्तरं ज्ञातुं ध्रुवसंज्ञकतारकं नलिकेण वेधयन्तु तथा यत्र लम्बसूत्रं पतिष्यति तत्रैव उत्तरदिशा ग्राह्यः भविष्यति यतोहि ध्रुवं उत्तरे एव स्थितः इति सिद्धम्।




एवं प्रकारेण मुहूर्तमार्तण्डे शुल्बसूत्रस्य निम्नश्लोकं उद्धृतम् -

**कृत्तिका श्रवणं पुष्यं चित्रास्वात्योर्यदन्तरम्।**
**एतत्प्राच्या दिशो रूपं युगमात्रादिते पुरे॥**[11]

अर्थात् कृत्तिका श्रवण पुष्य- चित्रा एवं स्वीती नक्षत्रभेदः पूर्वदि दिशां सूचयति। एतेषां नक्षत्राणां पालनम् अपेक्षितं यदा क्षितिजस्य उपरि 86 अङ्गुलयोः भवति। कात्यायनशुल्बसूत्रेषु

[9] ग्रहलाघव 4,21
[10] मुहुर्त्तमार्तण्ड 6,5
[11] कात्यायनशुल्व,34

शङ्कुविधिना छायागतिनिर्गमवृत्ताधारेण पूर्वादीनां दिशानां अन्बेषणविधिः दीयते । **समे शङ्कु निखाय शङकुसम्मितया रज्ज्वा मण्डलं परिलिख्य यत्र लेखयोः शङ्कग्रच्छाया निपतति तत्र शङकु निहन्ति सा प्राची। तदनन्तर रज्ज्वा अभ्यस्य पाशौ कृत्वा शङ्कोः पाशौ प्रतिमुच्य दक्षिणायम्य मध्ये शङ्कुमेवमुत्तरतः सोदीची । प्राच्यन्तयोः शङ्कू निहन्ति । श्रोण्यंसयोश्च । शङ्कोः पाशौ प्रतिमुच्य निरञ्छनेन गृहीत्वा दक्षिणपूर्वा दिशं हरन्ति। एवमुत्तरतः। विपर्यस्येतरतः। स समाधिः सर्वत्र।**[12] किन्तु , **नक्षत्रवेध दिग्ज्ञानमितो अन्यथैव । पूर्वापरा या अत्र कृता प्रकारैर्ज्ञेया बुधैः सा सममण्डलीया।**[13]

ध्रुवमत्स्यताराद्वयदर्शनद्वारा दिग्ज्ञानमुक्तं वास्तुराजवाल्लभे यत् उक्तम्ध्रुवतारकस्य उपरि मार्कटिका नामकः 2 तारकाः यदा भ्रमणकाले तारेण सह ऋजुरेखायां आगतवन्तः, अतः सा उत्तरदिशा भवति। मार्कटिकायाः द्वयोः तारकानां विपण्यलम्बं च एकस्मिन् सूत्रे स्यात्,अवलम्बस्य पृष्ठतः कलशे दीपं स्थापयित्वा,यदि उभयत्र एकस्मिन् सूत्रे दृश्यते, तर्हि दीपस्य दिक् दक्षिणं भविष्यति । दिक्कृत्य 32 अङ्गुलानां वृत्तं कृत्वा तस्य मध्ये 12 अङ्गुलानां शङकुं स्थापयित्वा यत्र तस्य छाया मण्डलं प्रविशति तत्र पश्चिमं यत्र सूर्योदयं तत्र पुर्वं दिशा भवति । एतयोः बिन्दुयोः संयोगेन तेषां योगे आकृष्टा रेखा पुर्वपश्चिमा भविष्यति यावत् उत्तर-दक्षिण-संयोगं कुर्वती रेखा याम्योत्तरा भवति ।[14]

दानवराजमया कथियति दिनादौ उक्तं शङकुं भूमौ स्थापितः । मध्यमे शङ्कुतः द्विगुणाप्रमाणवृत्तं कुर्यात् । तस्मिन् मण्डले यत्र मध्याह्नत् पूर्वं ततः परं च सूर्यच्छाया पतति तत् स्थानं चिह्नितव्यम् । यदि एतौ बिन्दुद्वयं संयोजितं भवति तर्हि निर्मिता रेखा पूर्वापरः पूर्वपश्चिमः च भविष्यति । यदि तयोः बिन्दुयोः मध्ये मत्स्याकारः आकृष्यते तर्हि शिखापुच्छस्य वा उत्तरदक्षिणदिशायाः वा साक्षात्कृत्य कर्तुं शक्यते । अस्मिन् सन्दर्भे पूर्वपश्चिमयोः बिन्दून् केन्द्रं कृत्वा द्वौ वृत्तौ आकर्षयन्तु ।अत्र ज्ञेयं यत् कन्यायां वृषराशिः सूर्यसन्निधानात् अपच्छाया न भवति यावत् मेष-मिथुन- सिंह-तुलायां अपच्छायाप्रमाणं अङ्गुलद्वयं भवति तथैव कर्कटेषु वृश्चिकेषु मीनेषु च चत्वारः तथा धनुराशिकुम्भे च सूर्यस्य सन्निधौ षट् अङ्गुलानि तथा मकरगतसूर्ये अष्टाङ्गुलानि भवन्ति । दक्षिणवामयोः समुचितसंशोधनं कृत्वा पूर्वपश्चिमच्छायासु रेखा कृत्वा दिशा ज्ञातव्या इति ।[15]

---

[12] कण्डिका 1,1-11
[13] सिद्धान्त,त्रिप्रश्नाधिकार 378
[14] वृत्तरत्नावली श्लोक 8,पृष्ठ 59
[15] मयमतं 6,6-13


स्वाती
पूर्व
चित्रा
सप्तर्षि
ध्रुव
उत्तर
दक्षिण
पश्चिम

चित्र......


उत्तरा दिक्
क
ख
प्रातः कालिनी छाया
शंकुः
सायंकालिनी छाया
पूर्वा दिक्
पश्चिमा दिक्
दक्षिणा दिक्

एवं प्रकारेण सूर्यसिद्धान्ते अपि शङ्कुना दिक् साधनानि कथितानि । चित्र.......






सूर्यस्य छाया द्वादशमासेषु एकरूपं न भवति। अतः सूर्यस्य नक्षत्रसंक्रमणानुसारेण विशुद्धतया पूर्वपश्चिमनिर्णयः कथं कर्त्तव्यं एवं अपच्छाया द्वारा कथं रक्षितं इति आचार्यस्य मतम् अस्ति यत् मेषसिंहमिथुनतुलायां सूर्ये यत्र शङ्कुच्छाया पतति ततः अङ्गुलद्वयं तस्मात् निवृत्त्य पूर्वपश्चिमं निर्धारयेत् । यस्मिनसमये सूर्यः कर्क-वृश्चिक-मीनराशिषु भवेत तदा तस्मिनसमये चत्वारि अङ्गुलानि निष्कास्य दिशा निर्धागयेत् । धनुकुम्भराश्योः षट् अङ्गुली यदा सूर्यःएवं मकरे अष्टाङ्गुलेषु दूरं शङ्कुच्छायायाः दक्षिणं वामं च सूत्रस्य प्रयोगः करणीयः ।

यस्मिन् दिशि मेष एवं तेला राशिः सूर्योदयः भवेत् तथा श्रवणकृत्तिकानक्षत्रयोः उदयं भवेत् सः पूर्वदिशा ज्ञातव्यम्। चित्रास्वातिनक्षत्रौ यदि मध्ये भवति तदैव पूर्वदिशा विचारणीया। अस्मिन् दिशि प्रासादनिर्माणेन नगरस्थापनेन वा आयुः, धनस्य च वृद्धिः भवति तथा विपरीतकार्यं कृत्वा वयः , धनस्य च अपव्ययः भवति।[16]

[16] राजवल्लभवास्तुशास्त्र अध्याय -1,पृष्ठ 180

# ज्योतिषशास्त्रे ग्रहाणां सम्बन्धितरोगानां विचारः

राकेश ममगाईं[1]

**शोधपत्रसारांशः -**

आयुर्वेदकर्मकाण्डादिषु पूर्वे यदि ज्योतिषशास्त्रस्य प्रयोगो भवति तु निश्चयेन रोगस्योत्पत्ति: पूर्वं रोगस्य सम्यक् ज्ञानं भविष्यति, परञ्च यदि रोगमस्ति तर्हि रोगिनां कृते सम्यक् औषधिनां ज्ञानं अथवा रोगिनां कृते औषधिकर्मकाण्डयोर्मध्ये सर्वाधिकोचितोपचारस्य ज्ञानं भविष्यति अथवा द्वयोरावश्यकमस्ति ( कर्मकाण्ड: + औषधिः) ज्ञानं भविष्यति। अतो ज्योतिषशास्त्रमाध्यमेन रोगानां सम्यक् ज्ञानमेव सम्यक् चिकित्सानां ज्ञानं भवति । पूर्वजन्मै: कृतपापकर्मणि वर्तमानजन्मसु रोगाणां रूपेण पीडा ददति। तेषां रोगाणां शान्ति: औषधिभि:, दानादिभि:, प्रभुनामस्मरणेन, देवानां पूजार्चनै: एव भवति।

**कूटशब्दाः -** आयुर्वेदः, कर्मकाण्डम्, ज्योतिषशास्त्रम्, रोगः, औषधिः, पूर्वजन्म, चरकसंहिता।

---

आयुर्वेदे रोगोस्योत्पत्ति: वातपित्तकफकारणैर्भवति। चरकसंहितानुसारेण वातविकारा: अशीति(८०) प्रकारका:, पित्तविकारा: चत्वारिंशत्(४०) प्रकारका:, कफविकाराश्च विंशतिविधा (२०) प्रतिपादिता: । अतो वातपित्तकफादीनां वैषम्यावस्थायां शारीरिका: मानसिकाश्च रोगा: भवन्ति।[2] शास्त्रेषु रोगपीडानामनैकानेक कारणान् मन्यन्ते यथा भूतादीनामावेश: ग्रहगति:, वातपित्तादीनां कोप: परन्तु वेदाङ्गज्योतिषशास्त्रे रोगस्योत्त्पत्ति कारणं पूर्वजन्मस्यकृत पापं एव ग्रहै इमानि फलानि दशान्तर्दशा समये ददति। यतोहि -

**रोगार्तानामिहं तु बहुधा कल्प्यते रोगहेतुः।**
**भूतावेशाद् ग्रहागतिवशाद् वातपित्तादिको पात्॥**
**एतत्तथ्यं त्रिविधमुदितं प्रायश: स्वीयपाप्मा:।**
**रोगोत्पत्तेर्भवति हि नृणां हेतुरेकस्त्रिधा स्यात्॥**[3]

---

[1] शोधच्छात्र:, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली

[2] वायु: पित्तं कफश्चोक्त: शारीरो दोषसंग्रह:। मानस: पुनरुद्दिष्टो राजश्च तम एव च॥ च.सं.,(सू.सं.) ५६।

[3] प्रश्नमार्गः १३ - २९, ३०।

ज्योतिषशास्त्रे रोगज्ञानर्थं सर्वप्रथमं राशिग्रहभावादीनां ज्ञानमत्यावश्यकम्। यथा -

**सूर्यसम्बन्धितरोगाः-**

**पित्तोष्णज्वरतापदेहतपनापस्मारहृत्क्रोडज,**
**व्याधीन्वक्ति रविर्दगार्त्यरिभयं त्वग्दोषमस्थिरुतुतिम्।**
**काण्ठाग्न्यस्त्रविषार्तिदारतनयव्यापच्चतुष्पाद्भयं,**
**चोरक्ष्मापतिधर्मदेवफणभृद्भूतेशभूतं भयम्॥**[4]

अर्थात् यदा सूर्यग्रहो रोगकारको पीडितो वा तदा पित्त सम्बन्धित रोगाः, उष्णज्वरः, देहतपनम् (ज्वलन), अपस्मारः(मिर्गी), हृदयसम्बन्धित रोगाः, नेत्ररोगाः,अस्थिसम्बन्धितरोगः, विषभयः, अग्निभयः, अग्निसम्बन्धितरोगाः आदिरोगाः भवन्ति । तथाश्च आत्महत्यसम्बन्धित मानसिकरोगेन पीडितो जायते। यतोहि सूर्यग्रहस्य पित्तात्मकप्रकृतिः, ऊष्णग्रहः एवम् आत्मतत्व कारको जायते, धातु विशेषोऽस्थिः।

**चन्द्रसम्बन्धितरोगाः -**

**निद्रालस्यकफातिसारपिटकाः शीतज्वरं चन्द्रमाः,**
**श्रृङ्ग्यब्जाहतिमग्निमान्द्यमरुचिं योषिव्द्यथाकामिलाः।**
**चेतः शान्तिमसृग्विकारमुदकाद्भीतिं च बालग्रहाद्**
**दुर्गाकिन्नरधर्मदेवफण्मृद्यक्ष्याश्च भीतिं वदेत्॥**[5]

अर्थात् यदा चन्द्रग्रहो रोगकारको निर्बलः पीडितो वा तदा निंद्रारोगेन पीडितोऽर्थात् अतिनिन्द्रा थवाल्पनिद्रा भवति, आलस्यः, कफसम्बन्धितविकारः, अतिसारः, शीतज्वरेण पीडितः, मंदानिर्थात् बुभुक्षा न भवति, अरुचिः, रक्तसम्बन्धितरोगः,जलात् भयः, मानसिकरोगाः, यक्षिणीभयसम्बधित रोगाश्च भवन्ति । यतोहि चन्द्रग्रहस्य कफप्रकृतिः, जलचरग्रहरेवम् कालपुरुषस्य मनो जायतेऽ मनकारकत्व धातुविशेषे रक्तः।

**भौमसम्बन्धितरोगाः -**

**तृष्णसृक्कोपपित्तज्वरमनलविषास्त्रार्तिकुष्ठाक्षिरोगान्,**
**गुल्मापस्मारमज्जाविहति परुषतापामिकादेहभङ्गान्।**[6]

अर्थात् यदि भौमग्रहो निर्बलः पीडितो वा तर्हि पित्तज्वरः, कुष्ठरोगः, नेत्ररोगः, गुल्मरोग (एपिन्डिसाइटीज) मज्जारोगः, देहभंगः, चर्मादिरोगः ( चमड़े में खुदेरापन अथवा खुजली ), बहु पिपासा, अग्नि-विष- शस्त्रेभ्यो भयः, अपस्मार :, मज्जासम्बन्धित रोगाः, व्रणः, पीनबीजः, ग्रन्थिरोगाश्च जायते । भौमग्रहसम्बन्धित कारकत्वा - पित्तात्मक प्रकृतिः, युवकः, उग्रस्वभावः, मज्जा धातुविशेषे -

[4] फलदीपिका, रोगनिर्णयः - २ .

[5] फलदीपिका, रोगनिर्णयः - ३ .

[6] फलदीपिका, रोगनिर्णयः - ४ .

**बुधसम्बन्धितरोगाः -**

**भ्रान्तिं दुर्वचनं दृगामयगलघ्राणोत्थरोगं ज्वरं।**
**पित्तश्लेष्मसमीरजं विषमपि त्वग्दोषपाण्ड्वामयान्।**
**दुःस्वप्नं च विचर्चिकाग्निपत्तने पारुष्य बन्धश्रमान्।**
**गन्धर्वक्षितिहर्म्यवाहिभिरपि ज्ञोवक्ति पीडां ग्रहैः॥**[7]

बुधग्रहो नीचस्थ निर्बलः पीडितो वा तु जातको भ्रान्तिः बुद्धिसम्बन्धितरोगो अर्थादल्पबुद्धिरादयः, नासिकरोगः, बौधिकक्षमता (अल्पमतिः), तर्कविहीनः, व्यर्थचिन्तां करोति, विनाकारणात् भयः, शंकायुयुक्तः, दुर्व्यसनी, नेत्ररोगाः, कण्ठसम्बन्धितरोगाः, त्रिदोषजन्यरोगाः ज्वरः वा (त्रिदोष=वात + पित्त + कफाः ), चर्मरोगाः, पीलिया, दुः स्वप्नसम्बन्धितरोगः, गन्धर्वाभिः जनित रोगाश्च जायते। बुधग्रहसम्बन्धितकारकत्वा - त्रिदोष प्रकृतिः, शिशुः, शुभस्वभावः, त्वक् सम्बन्धितकारकः -

**गुरुसम्बन्धितरोगाः -**

**गुल्मान्त्रज्वरशोकमोहकफजान् श्रोत्रार्तिमोहामयान्,**
**देवस्थाननिधिप्रपीडनमहीदेवेशशापोद्भवम्।**
**रोगं किन्नरयक्षदेवफणभृद्विद्याधराद्युद्भवं,**
**जीवः सूचयति स्वयं बुधगुरुत्कृष्टापचारोद्भवम्॥**[8]

गुरुग्रहजन्य रोगाः = उदररोगः, कफ सम्बन्धितरोगाः अस्मात् कारणात् मूर्छादयो जायते, कर्णरोगः, गुल्मरोगः ( एपिन्डिसाइटीज), अन्तो ज्वरः (अंतडियो का ज्वर ), आकाश तत्व विकारकारणेनोत्पन्न विकरः, स्थूलकायरित्यादयः रोगाः भवन्ति। गुरुग्रहसम्बन्धितकारकत्व = कफप्रकृतिः, वृद्धः, शुभस्वभावः, शरीरे वसाकारकत्वा, आकाशतत्वम्।

**शुक्रसम्बन्धितरोगाः-**

**पाण्डुश्लेष्मरुत्प्रकोपनयनव्यात्प्रमेहामयान् ,**
**गुह्यस्थाममूत्रकृच्छ्मदनव्यापत्तिशुक्लस्रुतिम्।**
**वारस्त्रीकृतदेहकान्ति विहत्तिं शोषामयं योगिनी,**
**यक्षीमातृगणाद्भयं प्रियसुहृद्भङ्ग सितः सूचयते॥**[9]

यदि शुक्रग्रहजनितरोगाः रक्तस्याल्पताकारणेन पीतरोगः, कफवायुकारणाभ्यां नेत्रदोषाः, मूत्रादयः सम्बन्धित रोगाः, गुप्तरोगः, प्रमेहजननेन्द्रियादयो रोगाः, सम्भोगेऽक्षमताथवात्यन्त सम्भोग कारणात् वीर्येऽल्पतः, कान्तिहीनः, शोषरोगः, स्त्रीविकृतिजनितप्रमेहादयः रोगाः भवन्ति। शुक्र सम्बन्धितकारकत्वा = ककात्मकः, तरुणः, शुभस्वभावः, शरीरे शुक्रस्य कारकत्वः।

[7] फलदीपिका, रोगनिर्णयः - ५ .

[8] फलदीपिका,रोगनिर्णयः - ६

[9] फलदीपिका,रोगनिर्णयः - ७

**शनिसम्बन्धितरोगाः-**

**वातश्लेष्मविकारपादविहति चापत्तितन्द्राश्रमान्,**
**भ्रान्तिं कुक्षितरुगन्तरुष्ण भृतकध्वंसं च पार्श्वाहतिम्।**
**भार्यापुत्रविपत्तिमङ्गविहार्तिं हृतापमर्कीत्मजो,**
**वृक्षाश्मक्षतिमाह कश्मलगणैः पीडा पिशाचादिभिः॥**[10]

शनिग्रहकालपुरुषस्य दुःखो जायते यदि कुण्डल्यांमध्येऽयं ग्रहनिर्बलो जायते तु वातपित्ताभ्याम् कारणाभ्याम् रोगोत्पत्ति जायते, पादपीडा अथवा पाद सम्बन्धित रोगाः, अतितन्द्रः, मानसिकभ्रान्तिः, कुक्षिसम्बन्धित रोगः, शरीरेऽधिकोष्णतः, हृदयतापः ( मानसिक चिन्तः), शरीरे व्रणश्च जायते।

**राहुकेतौसम्बन्धितरोगाः -**

**स्वर्भानुर्हृदि तापकुष्ठविमति व्याधिं विषं कृत्रिमं,**
**पादार्ति च पिशाचपन्नगभयं भार्यातनूजापदम्।**
**ब्रह्मक्षत्रविरोधशत्रु जभयं केतुस्तु संसूचयेत्,**
**प्रेतोत्थं च भयं विषं च गुलिको देहार्तिमाशौचजम्॥**[11]

राहुसम्बन्धितरोगाः = हृदयरोगः, हृदये तापः(जलन)कुष्ठरोगः, दुर्मतिः, बहुभ्रान्तिः, विषभयादय रोगाः अथवा दुर्व्यसन कारणात् जन्यरोगाः, मृर्गी, चेचकः( शीतला ), नेत्रसम्बन्धितविकारः,संक्रमण रोगाः, कृमिरोगश्च जायते केतुसम्बन्धित रोगाः = शारीरिकं मानसिकं वा दुःखः, क्लेशकारणाद् मानसिकचिन्ता, काण्डू रोग श्च जायते तथाश्च प्रश्नमार्गेऽपि -

**ज्वरस्तापस्तनौ मूर्ध्नि विशेषेणोण्णतेजसः।**
**अतिसारः सुधा भानोर्भूमिपुत्रस्य तु व्रणः॥**
**ज्ञस्य वाङ्मनसोः स्तम्भः पारवश्यं च नेत्रयोः।**
**वेदना संकलाङ्गेषु धीभ्रमश्च गुरोः स्मृतः॥**
**शोकः शुक्रस्य मन्दस्य सङ्कोचः करपादयोः।**
**राहोस्तु पतनं केतोर्व्याधिं व्रण उदाहृतः॥**

उपर्युक्त ग्रहाणां लग्नेशं भूत्वा षष्ठाष्टद्वादशभावैस्सह सम्बन्धं कुर्वन्ति या त्रिक् भावेषु स्वामी भवन्ति अथवा अशुभग्रहाणां लग्नेशतनुभावाभ्यां सह सम्बन्धं भवन्ति तु स्वदशान्तर्दशासमये रोगादयरुत्पत्तिर्भवन्ति।

**देहाधीशः सपापो व्ययरिपुमृत्तिगश्चेत्तदादेहसौख्यं,**
**न स्याज्जन्तोर्निजर्क्षे व्ययरिपुमृत्तिपस्तत्फलस्यैव कर्त्ता।**
**मूर्तो चेत्क्रूरखेटस्तदनु तनुपतिः स्वीयवीर्येण हीनो,**
**नानातङ्काकुलः स्याद् व्रजति हि मनुजो व्यधिमाधि प्रकोपम्॥**[12]

---

[10] फलदीपिका,रोगनिर्णयः - ८

[11] फलदीपिका, रोगनिर्णयः - ९

[12] जातकालङ्कारे, भावाध्यायः - २

दर्शनशास्त्रे दु:खत्रयो भवन्ति[13] – 1. आध्यात्मिक:, 2. आधिभौतिक:, 3. आधिदैविक:। व्याधिनां सम्बन्धोऽध्यात्मिकेन सह तथाध्यात्मिकोऽपि द्वौ भेदौ शारीरिकमानसिकौ। दर्शनशास्त्रे वदन्ति दृष्टार्थात् आध्यात्मिक दु:खानां निश्चितरुपेण विनाशं न । केवलप्रकृतिपुरुषयो: विज्ञानेनार्थात् विशिष्टज्ञानेनैव एकान्तिकात्यान्तिकदु:खानां विनाशं सम्भवोऽस्ति। **व्यक्ताव्यक्तज्ञविज्ञानात्** (सांख्यकारिका,द्वितीया कारिका) ज्योतिषशास्त्रे शारीरिकमानसिकरोगयो: सम्बन्ध: क्रमश: लग्नेशचन्द्राभ्यां सह यत: लग्नेशोऽर्थात् लग्ने स्वामी। लग्नम्=देह:[14] । चन्द्र: कालपुरुषस्य मनोऽस्ति यथोक्तं दैवज्ञवैद्यनाथ: जातकपारिजातके कालस्यात्मा भास्करश्रितमिन्दु:। अत: यदि लग्नेशचन्द्रौ निर्बल: तु निश्चयेन शारीरिकमानसिकरोगयोरुत्पत्तिर्जायते। शारीरिकरोगस्य द्वौ भेदौ स्त: - 1. स्वाभाविक: (जन्मजात:), 2. आगन्तुक:। स्वाभाविकरोगाणां विशेषरूपेण पञ्चज्ञानेन्द्रिय-सम्बन्धितविकाराणां शान्ति: केवलेश्वराशीर्वाद माध्यमेन। आगन्तुकरोगानां शान्त्यर्थं आयुर्वेद:, ज्योतिषशास्त्र:, कर्मकाण्ड: इत्यादय:। आयुर्वेदे औषधिभिर्माध्यमेन, कर्मकाण्डे यज्ञमन्त्रजपादिना भवति। परन्तु शिक्षाकल्पव्याकरणनिरुक्तछन्दज्योतिषविचितिषु षट्सु वेदाङ्गेषु ज्यौतिषं चक्षुरित्याख्यायते।

**वेदचक्षु: किलेदं स्मृतं ज्योतिषं मुख्यता चाङ्गमध्येऽस्य तेनोच्यते।**
**संयुतोऽपितिरै: कर्णनासादिभिश्चक्षुषाऽङ्गेन हीनो न किञ्चित्कर:॥**[15]

अतोऽऽयुर्वेदकर्मकाण्डादिषु पूर्वे यदि ज्योतिषशास्त्रस्य प्रयोगो भवति तु निश्चयेन रोगस्योत्पत्ति: पूर्वं रोगस्य सम्यक् ज्ञानं भविष्यति, परञ्च यदि रोगमस्ति तर्हि रोगिनां कृते सम्यक् औषधिनां ज्ञानं अथवा रोगिनां कृते औषधिकर्मकाण्डयोर्मध्ये सर्वाधिकोचितोपचारस्य ज्ञानं भविष्यति अथवा द्वयोरावश्यकमस्ति (कर्मकाण्ड:+औषधिः) ज्ञानं भविष्यति। अतो ज्योतिषशास्त्रेण रोगानां सम्यक् ज्ञानमेवं सम्यक् चिकित्सानां ज्ञानं भवति । पूर्वजन्मै: कृतपापकर्मणि वर्तमानजन्मसु रोगाणां रूपेण पीडा ददति। तेषां रोगाणां शान्ति: औषधिभि:, दानादिभि:, प्रभुनामस्मरणेन, देवानां पूजार्चनै: एव भवति । यथायुर्वेदे रोगादिनिदानार्थं सर्वोत्त्कृष्टः एवं प्रभावशालीमन्त्र: महामृत्युञ्जय(संजीवनीमन्त्रस्य) जपेन एवं रूद्राभिषेकेन शीघ्ररोगशान्तिर्भवति[16]।

**महामृत्युञ्जयमन्त्र: -**
**ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। ऊर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्॥**

---

[13]दु:खत्रयाऽभिद्याताज्जिज्ञासा तदभिघातके हेतौ।दृष्टे साऽपार्था चेन्नैकान्तात्यन्तन्ततोऽभावात्॥ सां.का.(प्र.का.)
[14]देहं द्रव्यपराक्रमौ सुखसुतो शत्रु: कलत्रं मुतिर्भाग्यं राज्यपदं क्रमेण गदिता: लाभव्ययौ लग्नत: ॥ जा.अ.(सं.अ.)-५।
[15] होरारत्नम्,भाग:-१,भूमिका,पृष्ठसंख्या-१।
[16]जन्मान्तरकृतं पापं व्याधिरूपेण बाधते। तच्छान्तिरोषधैर्दानैर्जपहोमसुरार्चनै:॥ चिकि.ज्यो. के मौ.त.,पृ.सं.-६९।

तथाश्च सर्वाधिकसरलोपायो गुरूणाम् सेवेन, माता-पित्रोः सेवेन, ब्राह्मणानां सेवेन, तर्पणादिभिः, अतिथिनां सेवेन ग्रहाणां शान्तिर्भवति। उक्तमपि शास्त्रे -

**शान्तिके पौष्टिके चापि वशीकरणकर्मणि। हुतसंख्यासमानं स्यादुत्तमं द्विजभोजनम्॥**[17]

- रोगकारकग्रहाणां बीजवैदिकमन्त्राणां।
- जपहोमाभ्याम्माध्यमेन।
- रोगकारकग्रहाणां औषधिस्नानमाध्यमेन।
- शुभग्रहाणां नगधारणं कृत्वा।
- ग्रहनक्षत्राणां वृक्षादयः वपनेन।

[17] प्रश्नमार्गः, त्रयोदशोऽध्यायः,श्लोकसंख्या - ३९।

# नागरशैल्यां प्राचीनमन्दिराणां स्थापत्यकला

मेघा शर्मा[1]

**शोधपत्रसारांशः** - भारतवर्षस्य पुरातनसंस्कृतिषु 'धर्म' प्रमुखस्थाने तिष्ठति। धार्मिकविचारेण मानवजीवनस्य कर्माणाम् सम्पादनम् जायते। तथा मानवजीवनदर्शनोऽपि तेषु आधारितोऽस्ति। वैदिकसंस्कृतिषु देवपुजायैः पुरोहितस्य तथा च यजमानस्य (क्षत्रिय) धार्मिकस्थानेषु नितान्तावश्यकतासीत्। देवालयानाम् निर्माणः अनुवैदिकयुगात् अवश्यमेव महाभारतेषु वास्तुकालायः विष्ठित परिचयं प्राप्यते, एषु भवनेषु उच्चकोटीशिल्पकला आसीत्। अस्मिन् शोधपत्रे अस्यैव विस्तृताध्ययनं कृतम्।

**कूटशब्दाः** - भारतवर्षम्, पुरातनसंस्कृतिः, धर्मः, मानवजीवनम्, वैदिकसंस्कृतिः, देवपूजा, पुरोहितः, यजमानः, क्षत्रियः, धार्मिकस्थानम्, देवालयः, महाभारतम्, वास्तुकाला,शिल्पम्।

---

संस्कृतवाङ्गमयं वैश्विकेतिहासस्य अन्यतमो वाङ्गमयमस्ति। अस्मादतिरिच्य सुविस्तृतं सुसमृद्धं अथ च शाश्वतज्ञानं समप्रतियावत् कुतोऽपि न प्राप्तवान्। इदम् तु न केवलं उपदेशवाचकमन्त्राणाम् समुहोवर्तते अथ च सुसभ्यजीवनस्य मूलसिद्धान्तानाम् सुविस्तारेण प्रतिष्ठितापकोऽपि वर्तते। सम्पूर्णवाङ्ग्यं मूलरूपेण चतुर्वेदेषु तथा च वेदाङ्गेषु (वेद,निरुक्त,कल्प,शिक्षा,व्याकरण,ज्योतिष) अष्टादशपुराणेषु न्यायमीमांसयोः धर्मशास्त्रेषु इत्यादिषु चतुर्दशविभागेषु विभक्तः सन्ति। वेदाङ्गरूपे ज्योतिषम् विज्ञानम् वर्तते। अस्य भौतिक अथ च आद्यात्मिकरूपद्वयम् वैशेषिकदर्शानानुसारेण अंगांगीनाम् येनप्रकारेण अभेदसम्बन्धो अभमन्यते तथैव वेदानामेवम् ज्योतिषस्य अभेद सम्बन्धो जायते। यतो ही ज्योतिष अंग वर्तते तथा च वेद अंगी जायते। ज्योतिर्विज्ञानम्मूलतः सिद्धान्त-जातक-संहिता नामेषु त्रिशाखाषु विभक्तः सन्ति। विकासक्रमे वास्तुशास्त्रम् ज्योतिषस्य संहिताशाखाषु अवच्छिन्नोजायते। अतेव वास्तुशास्त्रमपि वेदांगेषु अतिमहत्वपूर्णम् तथा च विशिष्टज्ञानम् वर्तते। वास्तुशब्दस्य उत्पत्तिः 'वस्' धातोः जायते, यस्यार्थो भवति- 'वसनम्' अर्थात् 'निवासम्'। प्राणीनाम् वासस्थानम् वास्तु इति कथ्यते। आचार्य विश्वकर्मोऽनुसारेण देव-मनुष्य-गज-गो-अश्वादिनाम् यत् निवासो जायते ताम् वास्तु इत्युच्यते।

---

[1] विद्यावारिधि (फलित ज्योतिष) श्री०ला०ब०शा०रा०स० विश्वविद्यालय नव देहली।

**देवतानां नराणाञ्च गजगोवाजिनामपि।**
**निवासभूमिश्शल्यज्ञैर्वास्तुसंज्ञमुदीरितम्॥**[2]

अनेनप्रकारेण "मानसार" तथा "मयमतम्" आदि ग्रन्थेष्वपि देवानाम् उत् वा मनुष्याणाम् निवासस्थानमपि वास्तु इति मन्यते।

**तैत(ति) लाश्च नराश्चैव यस्मिन्यस्मिन् परिस्थित(ष्ठि) ताः।**
**तद्वस्तु सु(सू)रिभिः प्रोक्तां(क्तं) तथा वै वक्ष्यतेऽधुना॥**
**अमर्त्याश्चैव मर्त्याश्च यत्र-यत्र वसन्ति हि।**
**तद् वस्त्विति मतं तज्ज्ञैः............॥**[3]

वास्तुशास्त्रस्य प्रभेदः –

1. आवासीयवास्तुः
2. ओद्योगिकवास्तुः
3. धार्मिकवास्तुः

भारतवर्षस्य पुरातनसंस्कृतिषु 'धर्म' प्रमुखस्थाने तिष्ठति। धार्मिकविचारेण मानवजीवनस्य कर्माणाम् सम्पादनम् जायते। तथा मानवजीवनदर्शनोऽपि तेषु आधारितोऽस्ति। वैदिकसंस्कृतिषु देवपुजायैः पुरोहितस्य तथा च यजमानस्य (क्षत्रिय) धार्मिकस्थानेषु नितान्तावश्यकतासीत्। देवालयानाम् निर्माणः अनुवैदिकयुगात् अवश्यमेव महाभारतेषु वास्तुकालायः विष्ठित परिचयं प्राप्यते, एषु भवनेषु उच्चकोटीशिल्पकला आसीत्।

**यस्तु प्रासादमुखोऽत्र विहिताः सर्वशिल्पिभी-**
**अतीव रम्यः सोऽप्यत्र प्रहसन्निव तिष्ठति॥**[4]

इष्टदेवानाम् स्थाननिश्चितरासीत्, यम् देवस्थानम्-देवातायनम्-देवालयम्-मन्दिरम् व इति कथितुम् शक्यते। सर्वेषाम् अर्थोजायते यत् वासस्थानम्। भारतेषु मन्दिनिर्माणस्य साक्ष्यानि मौर्यकालादेव उपल्भयते तथा अनन्तरम् यः सम्पूर्ण भारतेषु प्राप्यते। इदम् तु हिन्दूस्थापत्यकलायाः अन्यान्यन्न शैलीनाम् विषयस्य ज्ञानस्य मूलस्त्रोतांसि। स्थापत्यकलायासंबन्धितप्राचीनभासतेषु चतुर्महत्वपूर्णग्रन्थप्राप्यते -

1. कल्याणीः तृतीयचालुक्यशासकस्य कृत- मानसोल्लास
2. परमानभोजनरेशकृत – समरांगणसूत्रधार
3. भट्टभूवनकृत – अपराजितपृच्छा एवं मानसार

संरचनात्मकदेवालयाततिरिक्त मन्दिराणानाम् अन्योऽपि प्रकारोः अभूत। यः पाषाणानाम् छित्वः निर्मियते। एषु प्रमुखतमः महाबलीपुरस्य रथमण्डपम् यः पंचमशताब्दयाः अस्ति। गुप्तकालीनदेवालायः आकारे अत्यधिक लघुतम तथा वर्गाकारालीन्दः यस्मिन् आरोहणार्थे तथा च

[2] विश्वकर्मावास्तुशास्त्र- अध्याय-७.१
[3] मानसार- अध्याय- २.१
[4] सभापर्व - ६८

मध्य चतुष्कोण घोष्ठी यः गर्भगृहनामनोः ज्ञायते। तथा च घोष्ठयाः अपि समतल अभवत्, तथा च अतिरिक्तप्रदिक्षणापथोऽपि न आसीत्। निम्नलिखितदेवालयानि भारतस्य प्रारम्भस्थापत्यकलायाः उदाहरणानि सन्ति -

1. तिगवायाः विष्णुमन्दिरं(जबलपुर- म० प्र०)- मध्यप्रदेशस्य जबलपुरजनपदस्य समीपे स्थित तिगवानामक स्थाने मन्दिरमिदम् प्राप्यते। अस्य गर्भगृहस्य व्यासः अष्ठफुट, यस्य पूरास्थाने चतुः स्तम्भेः स्थितः। सप्तफुटस्य एकः अन्योऽपि लघुमण्डपम् तत्र विद्यते। स्तन्भेषु कलशाः उत् च कलशेषु सिंहनाम् पाषाणमूर्ति विद्यन्ते। प्रवेशद्वारस्य पार्श्वे गंगा-यमुनयोः आकृति तथा च तस्य वाहनाभ्याम् सह उत्कीर्णन प्राप्यते।

**चित्र-१**[5] **चित्र-२**[6]





2. भूमरायाः शिवमन्दिर(पन्ना,म०प्र०)- भूमरा सतनाजनपदे स्थित एको ऐतिहासिक स्थानम् वर्तते। अस्मिन स्थाने पंचम् शताब्द्यः मध्यनिर्मितः शिवमन्दिरम् स्थितः। अस्य मन्दिरस्य सम्प्रति केवलगर्भगृहेव विद्यमानोऽस्ति। अस्य गर्भगृहस्य परितः प्रदक्षिणापदस्य अवशेषोऽपि विद्यते। गुप्तकालीनमन्दिराणाम् प्रायः सर्वेलक्षणाः अस्मिन् विद्यते। द्वारस्तम्भानाम् दक्षिणे-वामे च गंगा-यमुनाः च मूर्ति अंकित विद्यते। अस्य गर्भगृहस्य प्रवेशद्वारम् मण्डपम् च प्रारम्भिक गुप्तमन्दिराणानाम् अपेक्षा अत्यधिकालंकृत अस्ति।

---

[5] https://www.google.co.in/search?q=tigan%20ka%20vishnu%20mandir%20jabalpur%20mp&tbm=isch&tbs=rimg:CQnefVEkloSsYftYvvufAyF-8AEAsgIMCgIIABAAOgQIARAA&client=safari&prmd=inmv&hl=en-GB&sa=X&ved=0CBIQuIIBahcKEwi4qL

[6] https://www.google.co.in/search?q=tigan%20ka%20vishnu%20mandir%20jabalpur%20mp&tbm=isch&tbs=rimg:CQnefVEkloSsYftYvvufAyF-8AEAsgIMCgIIABAAOgQIARAA&c94cH5AhUAAAAAHQAAAAAQGg&biw=414&bih=715#imgrc=LBaejzr2UtnbtM&imgdii=1mhzHUZLRvukxM



चित्रा-३.



चित्र-४[7]

3. देवगढानाम् दशावतारमन्दिर (ललितपुर, उ०प्र०)- अस्य मन्दिरस्य समयः षड्गताब्दी इति मन्यते। यदा गुप्तवास्तुकला स्वविकाशस्य चर्मोत्कर्शस्थानेऽसीत्। देवगढे वेतवानद्यः तटे स्थितोऽस्ति। तटस्यसमीपे पर्वते चतुर्विंशतीमन्दिराणाम् अवशेषो विद्यते। यानि सप्तमशताब्दयाम् आरम्भे-द्वादशशताब्दयाम् यावत् निर्मितासीत्।

4. दशावतारविष्णुमन्दिर सम्भतयः देवगढस्य सर्वोत्कृष्ट स्मारको वर्तते। यः स्वरमणीय कलायैः भारतेषु सर्वोत्कृष्ठ मन्दिराणाम् मध्ये तिष्ठति। देवगढस्य अस्य मन्दिरस्य शिखर नोऽधिक उच्चैवर्तते अपितु अस्मिन् शिखरे वृत्ताकार आकृति असित। सम्प्रति अस्य शिखरस्य अधोभागस्य वृत्तमेव शेषो जायते। किन्तु तत्र पूर्णशिखरस्य अभासोऽपि प्राप्यते।

5. शिखरस्य आधारे परितः प्रदक्षिणामार्गस्य समतलासीत्। यस्य पूराभागे बह्द् तथा च लघु शैत्य वातायनानि आसीत्। यथा महाबलीपुरस्य रथेषु विद्यते। द्वारमण्डपम् द्वौ विशालस्तम्भयोः आधारीत् आसीत्। प्रवेशद्वारे पाषाणस्य अस्ति। येषु अनेकदेवतानां तथा च गंगा- यमुनोः प्रतिमा उत्कीर्ण विद्यते। देवालयस्य वहीरभित्तिनाम विशालपटयोः गजेन्द्रमोक्ष शेषासांयभगवतः विष्णोः इत्यादिनः कलात्मक भित्तिचित्राणी अंकित विद्यते। मन्दिरस्य परितः गुप्तकालिकमूर्ति- कलायाः वैभवमवलोकनियो वर्तते।

6. रामायण तथा च भगवतः कृष्णस्य लीलायाः सम्बन्धित विषयाणाम् चित्रम् अत्यधिककलापूर्णशैलिषु जायते।

[7]https://www.google.co.in/search?q=bhumrah+ka+shiv+mandir+panna+mp&client=safari&hl=en-GB&prmd=inmv&source=lnms&tbm=isch&sa=X



चित्र-५[8]



चित्र-६[9]

7. भीतरगांव मन्दिर(कानपुर,उ०प्र०)- इष्टिकाया निर्मित देवालयमिदम् स्व सुरक्षित तथा च उत्तमाकृतिषु व्यवस्थितिष्टिकायाम् कारणेन् विशेषरूपेण प्रसिद्धोऽस्ति। अस्य प्रत्येक इष्टिका शोभनियम् उत्वः आर्कषणम् आलेखनैः खचितासीत्। अस्य फुटद्वयम् दीर्घ एवं विस्तृत कोष्ठक अनेकानेक सजीव-सुन्दर तथा च उत्कीर्णीत मूर्तिभिः परिपूर्णा सन्ति। अस्य शिखरमयी तथा च बहिरभित्तिनामालिपे मृणमयीमूर्तिः दृश्यते। अस्य मन्दिरस्य सहस्त्रादिकुत्खचितीष्टिका लखनऊसंग्रहालय सुरक्षितः सन्ति। यस्मिन मंचे देवालयोः स्थितः तस्य आकारः ३६*४७ इत्यस्ति। संतमत आन्तरिकरूपे १५फीट*१५फीट अस्ति। संतमत इति द्विभित्तिकाः वर्तते। भित्तिकः अष्ठफीट स्थूलोजायते। पृथ्वीतः शीर्षयावत सम्पूर्ण ६८.२५फीट उच्चै आसीत्।

चित्र-७[10]



---

[8]https://www.google.co.in/search?q=devgadh+ka+dashavatar+mandir&client=safari&hl=en-GB&prmd=vmin&source=lnms&tbm=isch&sa=X&ved=2ahUKEwjKgOaP58H5AhU5ZWwGHf6MAzMQ_AUoA3oE

[9]https://www.google.co.in/search?q=devgadh+ka+dashavatar+mandir&client=safari&hl=en-GB&prmd=vmin&source=lnms&tbm=isch&sa=X&ved=2ahUKEwjKgOaP58H5AhU5ZWwGHf6MAzMQ_AUoA3oE

[10]https://www.google.co.in/search?q=bhitargaon+ka+mandir+kanpur&client=safari&hl=en-GB&prmd=vmin&source=lnms&tbm=isch&sa=X&ved=0ahUKEwjG6oyy68H5AhWcZWwGHXYED2MQ_AUIGC

चित्र-८[11]



अत्र तु कोऽपि वातायनम् न विद्यते। टेराकोटामूर्तिकलायाम् धर्मनिरपेक्ष तथा च धार्मिक विषयान् प्रदर्शितः कृत्वान्। यथा गणेशस्य आदिवराहस्य महिषासूरमर्दनया नदीदेवतायः इत्यादि मिथक तथा च उत्कीर्ण कथा सीतायाः अपहरणम् तथा च नरनारायणतपस्याः प्रतिनिधित्व करोति। मन्दिर स्थापत्य संबन्धित अन्यो नामो विद्यते यथा- पंचायत-भूमि-विमान-भद्रथ-कर्णरथ-प्रतिरथ आदिऽपि प्राचीनग्रन्थेषु प्राप्यते। छठीशताब्द्याः यावत् उत्तर उत्वा दक्षिण भारतेषु मन्दिरवास्तुकलाशैली एकसमारासीत्। किन्तु छठम् शताब्दयान्तरम् प्रत्येकक्षेत्रस्य विभिन्न दिशासु विकासम् जायते। ऐतिहासिक कारणेम उत्तर तथा दक्षिण भारतस्य स्थापत्यकलायां भिन्नः सम्यगरूपेण उदभवति, किन्तु सांस्कृतिकविचारेषु तत्र न भेदः। साहित्यिक प्रामाणैः तथा च उपलब्ध भौतिकावशेषैः ज्ञायते यत् सम्पूर्ण भारते मन्दिरस्थापत्यकलायाः त्रयः शैलीः प्रचलितः आसीत्।

1. उत्तरभारते नागरशैली
2. दक्कन वेसरशैली
3. दक्षिणे द्रविडशैली

नागरशैली-नगरशब्दात् नागरेति जायते। सर्वप्रथमे नगरे एव निर्माणेतवेन इयम नागरशैली इति अभिदियते। अष्ठम् शतब्दीतः त्रीयोदशशताब्दयाः मध्य उत्तरभारते तत्त्कालीन शासककुलः इमाम् संरक्षणम् अधियतः। नागरशैल्याः मन्दिराणि वर्गाकारम् उत् वा चतुष्कोणीयाधारे निर्मितवान्। अस्योऽपि शिखरो(विमानम्) विद्यते। तथा च तस्य रेखा उपरी-उपरी यातुम् मन्दम्-मन्दम् अर्न्ततः झुकाव अर्थात् उपरी-उपरी क्रमे शिखरम् उत्तरोत्तमम् कृष्म् भवति। अनेन प्रकारेण शिखरम् वर्काकारम् उत् वाः रेखीय इति जातम्। अस्य शीर्षे वृत्ताकार आमलकस्य कलशस्य ध्वजदण्डस्य च स्थापना अभवत्। अस्या शैल्याः मन्दिराणाम् आधारः बहुरतः स्वास्तिकरुपेण अव्लोक्यते। आधारास्य स्वास्तिकाकारयोजना तथा च उपरी वर्काकारशिखरं उत्तरभारतस्य प्रायसः सर्वे मन्दिराणाम् विशेषतः आसीत्। ईशानशिवगुरुदेवपद्धतेः रचनाकारः ईशानशिवगुरुमिश्रः, शिल्परत्नाकारः तथा च शिवकुमारस्य मतमस्ति यत् यः नागरशैल्याः प्रासादानि

